# गुरु पादुका स्तोत्रम्

ॐ नमो गुरुभ्यो गुरुपादुकाभ्यों |
नमः परेभ्यः परपादुकाभ्यः ||
आचार्य सिध्देश्वर पादुकाभ्यों
नमो नमः श्री गुरु पादुकाभ्यां ||1||

कामादि सर्प व्रजगारुडाभ्यां |
विवेक वैराग्य निधि प्रदाभ्यां ||
बोध प्रदाभ्यां द्रुत मोक्षदाभ्यां |
नमो नमः श्री गुरु पादुकाभ्यां ||2||

अनंत संसार समुद्रतार,
नौकायिताभ्यां स्थिर भक्तिदाभ्यां |
जाड्याब्धि संशोषण वाडवाभ्यां,
नमो नमः श्री गुरु पादुकाभ्यां ||3||

ऊँकार ह्रींकार रहस्ययुक्त
श्रींकार गुढ़ार्थ महाविभुत्या |
ऊँकार मर्मं प्रतिपादिनीभ्यां
नमो नमः श्री गुरु पादुकाभ्यां ||4||

होत्राग्नि, हौत्राग्नि हविष्य होतृ
होमादि सर्वकृति भासमानम् |
यद ब्रह्म तद वोधवितारिणीभ्यां,
नमो नमः श्री गुरु पादुकाभ्यां ||5||